निषिद्धकालमाह ।
सद्यः स्नातस्य भुक्तस्य क्षुत्तृष्णातपसेविनः ।
व्यायामाक्रान्तदेहस्य सम्यङ्नाड़ी न बुध्यते ॥
तैलाभ्यङ्गे च सुप्ते च तथा च भोजनान्तरे ।
तथा न ज्ञायते नाड़ी यथा दुर्गतरा नदी ॥
सुप्ते निद्राकाले भोजनान्तरे भोजनमध्ये भोजनावसानमात्रे च । वातमूर्च्छादिचलिकरोगे नायं विधिः ॥ * ॥

अथ वातादिस्वभावक्रममाह ।
आदौ च वहते वातो मध्ये पित्तं तथैव च ।
अन्ते च वहते श्लेष्मा नाड़िकात्रयलक्षणम् ॥
आदाविति कफोष्णिपीड़ितद्वितीयपर्व्वणि । न तु तर्ज्जनीनिवेशस्थले स्थानभेदस्य क्वचाप्यवक्ष्यमाणत्वात् ॥ * ॥
सुस्थताज्ञानार्थमाह ।
भूलतागमनप्राया स्वच्छा स्वास्थ्यमयी शिरा ।
प्रायेति बाहुल्येन । स्वच्छा परितो जाड्यरहिता । 'स्वास्थ्यमयी सुस्थतार्थज्ञिका च । तथा ।
प्रातः स्निग्धमयी नाड़ी मध्याह्ने चोष्णतान्विता ।
सायाह्ने धावमाना च चिराद्रोगविवर्ज्जिता ॥
चिरादिति अतीतानागतयोर्द्वयोरप्युक्तिः पथ्याशितानामेव ॥ * ॥
वातादीनां क्रमेण गतिमाह ।
वाताद्वक्रगता नाड़ी चपला पित्तवाहिनी ।
स्थिरा श्लेष्मवती ज्ञेया मिश्रिते मिश्रिता भवेत् ॥
वक्रेति वायोस्तिर्य्यग्गमनात्तिरो वहन्तीति । एवं तत्प्रकोपादिना वार्त्तादिगतिरपि ज्ञातव्या । चपलेति वह्नेरूर्द्ध्वज्वलनादूर्द्ध्वचञ्चला । स्थिरेति जलस्य नीचगमनादनुल्वणा । मिश्रिते मिश्रचिह्ना भवति । तेन द्विदोषजे उभयचिह्ना । सर्व्वजे सर्व्वचिह्नेति । चपलता स्थिरतयोः समयभेदेनाविरोधः ॥ * ॥
उक्तवक्रादिसामान्यस्य क्रमेण विशेषमाह ।
सर्पजलौकादिगतिं वदन्ति विबुधाः प्रभञ्जनेन नाड़ीम् ।
पित्ते च काकलावकभेकादिगतिं विदुः सुधियः ॥
राजहंसमयूराणां पारावतकपोतयोः ।
कुक्कुटादिगतिं धत्ते धमनी कफसंवृता ॥
आदिना वाते वृश्चिकगतिर्दोलायिता । आदिशब्देन पित्ते कलिङ्ककलविङ्कादिगतिः । कफे गजवराङ्गनादिगतिः ॥ * ॥
द्वन्द्वजस्यापि क्रमेणैव भेदानाह ।
मुहुः सर्पगतिं नाड़ीं मुहुर्भेकगतिं तथा ।
वातपित्तद्वयोद्भूतां प्रवदन्ति विचक्षणाः ॥
भुजगादिगतिञ्चैव राजहंसगतिं धराम् ।
वातश्लेष्मसमुद्भूतां भाषन्ते तद्विदो जनाः ॥
मण्डूकादिगतिं नाड़ीं मयूरादिगतिं तथा ।
पित्तश्लेष्मसमुद्भूतां प्रवदन्ति महाधियः ॥
त्रिदोषजामप्याह ।
उरगादिलावकादिहंसादीनाञ्च बिभ्रती गमनम् ।
वातादीनाञ्च समं धमनीसम्बन्धमाधत्ते ॥

सममिति न्यूनाधिकतानिरासः ॥ क्रमगत्या तु नासाध्यत्वम् । तथा,—
लावतित्तिरिवार्त्तीकगमनं सन्निपाततः ।
कदाचिन्मन्दगा नाड़ी कदाचिच्छीघ्रगा भवेत् ॥
त्रिदोषप्रभवे रोगे विज्ञेया हि भिषग्वरैः ।
पित्तक्रमतया कृच्छ्रसाध्यत्वमसाध्यत्वञ्च ॥ * ॥
सामान्यतः सुखसाध्यत्वमाह ।
यदायं धातुमाप्नोति तदा नाड़ी तथा गतिः ।
तथाहि सुखसाध्यत्वं नाड़ीज्ञानेन बुध्यते ॥
अयमर्थः । अपराह्णादौ नाड़ी वातोल्वणा प्रथमं वातगत्यैव वहति ततो यथायथं पित्तादिगत्या न तु पित्तोल्वणत्वे वातादिगत्या तदा सुखसाध्यत्वं व्यतिरेकेण व्यतिरेकः । तदुक्तमन्यैः ।
नाड़ी यथाकालगतिस्तथायां
प्रकोपशान्त्यादिभिरेव भूयः ॥ * ॥
तथासाध्यरूपमाह ।
मन्दं मन्दं शिथिलशिथिलं व्याकुलं व्याकुलं वा
स्थित्वा स्थित्वा वहति धमनी याति नाशञ्च सूक्ष्मा ।
नित्यं स्थानात् स्खलति पुनरप्यङ्गुलिं संस्पृशेद्वा
भावैरेवं बहुविधविधैः सन्निपातादसाध्या ॥
मन्दं मन्दं मुहुरनुद्भटं अप्रखरमिति यावत् । शिथिलेति स्खलद्गतिरूपम् । व्याकुलेति त्रस्तवदितस्ततः । वाशब्दः समुच्चये । स्थित्वा स्थित्वेत्यावृत्त्या च तद्रूपैव गतिः । नाशमदर्शनम् । गच्छति कदाचिन्नाड़ीस्पन्दोऽपि न लभ्यते इत्यर्थः । सूक्ष्मेति यदि लभ्यते तदा तथैवानित्यं प्रायः स्थानमङ्गुष्ठमूलं तस्मात् स्खलति कदापि तत्र न स्पन्दत इत्यर्थः । तदुक्तम् । हन्ति च स्थानविच्युतेति किञ्चित् स्फुरती कुत्रापि । पुनरपीति कियद्विलम्बेन अङ्गुलीमङ्गुलोन्मूलमेवमित्थंरूपैर्बहुभिर्भावैर्धर्म्मैः । उक्तञ्चान्यत्र ।
महातापेऽपि शीतत्वं शीतत्वे तापिता शिरा ।
नानाविधगतिर्यस्य तस्य मृत्युर्न संशयः ॥
महेत्याशयाकृष्टपित्तादिकृततापनिरासः शीतत्व इत्यत्रापि महेति सम्बध्यते । तथा,—
त्रिदोषे स्पन्दते नाड़ी मृत्युकालेऽपि निश्चला ।
निश्चला स्पन्दसामान्याभाववती । अतीसारादौ हस्तपादादिस्वेदादिना स्पन्दोपलम्भात् । तथा ।
पूर्ब्बं पित्तगतिं प्रभञ्जनगतिं श्लेष्माणमाबिभ्रतीं
सन्तानभ्रमणं मुहुर्व्विदधतीं चक्राधिरूढ़ामिव ।
तीव्रत्वं दधतीं कलापि गतिकां सूक्ष्मत्वमातन्वतीं
नोऽसाध्यां धमनीं वदन्ति सुधियो नाड़ीगतिज्ञानिनः ॥
अयमर्थः । पूर्ब्बमिति क्रमविपर्य्यये पित्तादिगतिमतीं वारं वारमेवं क्रमेण चक्रोपरिभ्राम्यमाणामिव । तथा तीव्रत्वमतिशयवेगं एवञ्च कदाचिन्मयूरवद्गमनाम् । तथोत्तरोत्तरं कृशतामापादयन्तीति विशिष्टो हेतुः । तथा चान्यत्र ।
"यालुका च स्थिरात्यन्ता या चेयं मांसवाहिनी ।
या च सूक्ष्मा च वक्रा च तामसाध्यां विदुर्बुधाः ॥
अणुका महतोऽप्युच्चतरा पृथगिवोन्नता वा कदाचिदिति स्थिरा प्रणिधानेनैव गम्यमानस्पन्दा च । मांसवाहिनी मांसाहार इव गतिमती लगुड़प्रायेति । तदुक्तं मांसेन लगुड़ाकृतिः । मांसेन समं वहतीति न युक्तं तद्रूपपरिज्ञापकप्रकारस्यानुक्तत्वात् । इयमपि विशिष्टबोधनाय । या च सूक्ष्मा च वक्रा चेति पृथगिव वाक्यान्तरमिति ॥ * ॥
असाध्यत्वापवादमाह ।
भारप्रवाहमूर्च्छाभयशोकप्रमुखकारणान्नाड़ी ।
संमूर्च्छितापि गाढ़ं पुनरपि सा जीवितं धत्ते ॥
चिरतरबहुलभारोद्वहनेन वा विषवेगधारावाहिरुधिरदर्शनादिजनितमूर्च्छया वा व्याघ्रादिसन्दर्शनादिभयेन वा पुत्रादिविरहजनितशोकातिरेकेण वा संमूर्च्छितापि अतिनिस्पन्दापि । गाढ़मिति सुतरां कार्श्यादियोगेऽपीत्यर्थः । पुनरिति साध्यतां यातीत्यर्थः । भावानां रत्यादीनां प्रवाह इति न युक्तं भयशोकयोः पृथग्विधानात् । प्रमुखेत्यनेन हेत्वन्तराभिधानम् । तदुक्तम् ।
पतितः सन्धितो भेदी नष्टशुक्रश्च यो नरः ।
शाम्यते विस्मयस्तस्य न किञ्चिन्मृत्युकारणम् ॥
पतितः उच्चादितः सन्धितः अस्थ्यादिसन्धानेन संहितः भेदी अतीसारवान् नष्टशुक्रो यक्ष्मादिनातिरमणेन वा शुक्रक्षयवान् । विस्मयोऽसाध्यत्वानुमानं शाम्यति नावतरति । कारणं प्रागुक्तं तत्तदेव । अन्यच्चापि ।
तथा भूताभिषङ्गेऽपि त्रिदोषवदुपस्थिता ।
समाङ्गा वहते नाड़ी तथा च न क्रमं गता ॥
अपमृत्युन रोगाङ्गा नाड़ी तत्सन्निपातवत् ।
भूताभिषङ्गे तथा भूतसामान्याभिषङ्गे च देवजुष्टादौ नाड़ी सन्निपातधर्म्मशालिनी उपस्थिता । आपातत एव भवति न तु तत्फलप्रदा । भेदमाह । समेति वातपित्तकफस्वभावक्रमवती तथाक्रमं व्यतिक्रमं न गता । तस्मादेव अपमृत्युः अपगतो मृत्युर्यस्याः सा तथा । परमार्थतः सन्निपातवदपि सन्निपातजन्या न स्यात् इति । तदुक्तम् ।
स्वस्थानहीने शोके च हिमाक्रान्ते च निर्गदाः ।
भवन्ति निश्चला नाड्यो न किञ्चित्तत्र दूषणमिति ॥
स्वस्थानहीन उच्चादितः पतने । अङ्गुष्ठमूलतस्खरण इति तुल्यार्थः । निर्गदा इत्यसङ्गतिः निर्गदा अपि निश्चला भवन्ति । दूषणमसाध्यत्वभ्रमः । अन्ये त्वाहुः ।
स्तोकं वातकफं दुष्टं पित्तं वहति दारुणम् ।
पित्तस्थानं विजानीयात् भेषजं तस्य कारयेदिति ॥
अयमर्थः । वातकफाभ्यां नाड़ी किञ्चिद्वहति दुष्टं क्षीणत्वाधिकत्वाभ्यामपि विशेषादुल्वणं